# Saranatha Stotram

# સારનાથસ્તોત્રમ્

## Document Information

Text title : Saranatha Stotram

File name : sAranAthastotram.itx

Category : vishhnu, stotra

Location : doc_vishhnu

Proofread by : Rajesh Thyagarajan

Description/comments : From Stotrasamuchchaya 2, Edited by Pandit K. Parameshwara Aithal

Latest update : May 10, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2023

*sanskritdocuments.org*

# સારનાથસ્તોત્રમ્

સારક્ષેત્રપતિં સરોજજપતિં સારાતિદૂરં સદા
    સારં સારવિમાનગં સુરવરં સારેશ્વરીનાયકમ્ ।
નિત્યં સારસરોવરે વિરચિતસ્નાનદ્વિજારાધિતં
    સંસારાબ્ધિતરિં સરોજનયનં તં સારનાથં ભજે ॥ ૧॥

સર્વતત્ત્વાલય શ્રીમન્ વ્યાકૃતાઘશિરો હરે ।
પરમાત્મન્ સારનાથ રક્ષ માં શરણાગતમ્ ॥ ૨॥

સમસ્તજગદાધાર શઙ્ખચક્રગદાધર ।
સારનાથ મમાનુજ્ઞાં દેહિ ત્વત્તીર્થસેવને ॥ ૩॥

સારક્ષેત્રે સારનાથઃ સારપુષ્કરિણીતટે ।
રમયા સારનાયક્યા વિમાને સારસાહ્વકે ॥ ૪॥

અવ્યાજકૃપયા નિત્યં તત્ર સન્નિહિતો હરિઃ ।
શ્રિતાભીષ્ટં દદન્નિત્યં મોદતે સૂરિભિઃ સહ ॥ ૫॥

પઞ્ચસારમિદં નિત્યં યઃ સ્મરેત્ પ્રયતઃ પુમાન્ ।
સ સર્વાનર્થિતાનર્થાન્ ધ્રુવમાપ્નોતિ પૂરુષઃ ॥ ૬॥

નાચ્યારુચારુવદનામ્બુજરાજહંસં
    સત્સારખચ્ચરિતપૂર્ણમુદારહાસમ્ ।
સંસારસાગરતરિં હૃદયાબ્જવાસં
    તં શ્રીનિવાસમમજં સ્વરમાવતંસમ્ ॥ ૭॥

નમસ્તે સારનાથાય કાવેરીવરદાયિને ।
સર્વપાપવિનાશાય સર્વાભીષ્ટપ્રદાયિને ॥ ૮॥

સારક્ષેત્ર નિવાસાય સારપુષ્કરિણીતટે ।
યસ્ય પ્રસાદાત્ કાવેરી ગઙ્ગાધિક્યં પુરા ગતા ॥ ૯॥

ભક્તાભીષ્ટફલપ્રદાઙ્ઘ્રિયુગલં કૌશેયરાજત્કટિં
લક્ષ્મીમઙ્ગલમન્દિરોરસિ લસન્મુક્તાવલીકૌસ્તુભમ્ ।
હસ્તૈઃ શઙ્ખરથાઙ્ગપઙ્કજગદા બિભ્રાણમભ્રાકૃતિં
રાકાચન્દ્રમુખં સુજાતમકુટં શ્રીસારનાથં ભજે ॥ ૧૦॥

સારક્ષેત્રે પવિત્રે સુજનસુખકરે સારકાસારતીરે
સારાવ્યવ્યોમયાને વિરચિતનિલયઃ સારનેચ્યા સમેતઃ ।
સારામ્ભોધાનકઞ્જાયિતનયનયુગઃ ફાલસૌન્દર્યસારઃ
સંસારાબ્ધેરસારાત્ સ હરિરવતુ માં સારનાથો રમેશઃ ॥ ૧૧॥

આલોડ્ય ચિન્તિતપદા શ્રુતિરાહ યસ્મા-
દાસ્તમ્બમામ્બુજભવેન્દુશિરોમણિભ્યામ્ ।
ઉત્પત્તિજીવનલયાનુદિતાન્યયોગ-
હાનં શ્રિયઃપતિમમું હૃદિ ચિન્તયામઃ ॥ ૧૨॥

યસ્માદથર્વશિખયા દ્રુહિણસ્વમૂર્તિ-
રુદ્રેન્દ્રમૂલજગતોઽભિહિતા પ્રસૂતિઃ ।
પૈઙ્ગ્યશ્રુતિસ્ફુટગતિપ્રતિપન્નરૂપા
પદ્માસનં તમનિશં પ્રણમામિ દેવમ્ ॥ ૧૩॥

યત્પત્નીદૃષ્ટિલેશાદ્ દ્રુહિણહરમુખા લબ્ધસત્તાઃ સુરેન્દ્રા
યદ્ભક્તાનાં નિયમ્યાઃ સકલસુરગણા બ્રહ્મરુદ્રેન્દ્રમુખ્યાઃ ।
યત્પાદક્ષાલનામ્બુ પ્રથયતિ શુચિતાં ચન્દ્રમૌલેશ્ચ લોકે
તસ્મૈ નારાયણાય પ્રવિતનુત નુતિં સર્વભૂતાન્તરાય ॥ ૧૪॥

બ્રહ્મેશાદેર્નિયન્તા પરમપુરુષ ઇત્યાહ નિત્યા હિ વાણી
પુંવાક્યૈસ્તસ્ય બાધઃ કથમિવ ભવિતા પ્રાપ્તદોષપ્રભેદૈઃ ।
દૂરાપાસ્તં ચ ગૌરીમધુમથનભિદાબાધકં વાક્યજાલં
લક્ષ્મીશં તં પ્રપદ્યે પ્રતિભટરહિતપ્રાભવોદ્ભૂતિભવ્યમ્ ॥ ૧૫॥

વેદાન્તેષુ પ્રતીતાત્ તદિતરભજનાદ્ યસ્ય ભક્તિઃ પ્રકૃષ્ટા
તત્રૈવ સ્થાનમગ્ર્યં સ્ફુરતિ વિધિશિવસ્થાનતોઽપ્યૂર્ધ્વદેશે ।
લક્ષ્મ્યા સાર્ધં તમેકં હૃદયસરસિજે બ્રહ્મવિદ્યાપ્રદાત્ર્યા
દેવં નારાયણાખ્યં ભવજલધિસમુત્તારણં સંશ્રયામઃ ॥ ૧૬॥

ઇતિ શ્રીસારનાથસ્તોત્રં સમ્પૂર્ણમ્ ।

સ્તોત્રસમુચ્ચયઃ ૨ (૭૬)

The God Saranatha at Tirucherai (near Kumbakonam)
is eulogized in this stotra (76) describing
the various sacred objects in that place.

Proofread by Rajesh Thyagarajan

*Saranatha Stotram*

pdf was typeset on May 11, 2023

Please send corrections to *sanskrit@cheerful.com*